षडानन स्तुतिः

षडानन स्तुतिः

श्रीगौरीसहितेशफालनयनादुद्भूतमग्न्याशुग-
-व्यूढं विष्णुपदीपयः शरवणे संभूतमन्यादृशं |
षोढाविग्रहसुंदरास्यममलं श्रीकृत्तिकाप्रीतये
शर्वाण्यंकविभूषणं स्फुरतु मच्चित्ते गुहाख्यं महः || 1 ||

त्रिषडकृशदृगब्जः षण्मुखांभोरुहश्रीः
द्विषडतुलभुजाढ्यः कोटिकंदर्पशोभः |
शिखिवरमधिरूढः शिक्षयन् सर्वलोकान्
कलयतु मम भव्यं कार्तिकेयो महात्मा || 2 ||

यद्रूपं निर्गुणं ते तदिह गुणमहायोगिभिर्ध्यानगम्यं
यच्चान्यद्विश्वरूपं तदनवधितया योगिभिश्चाप्यचिंत्यं |
षड्वक्त्राष्टादशाक्षाद्युपहितकरुणामूर्तिरेषैव भाति
स्वाराध्याशेषदुःखप्रशमनबहुलीलास्पदा चाप्यतुल्या || 3 ||

यच्छ्रीमत्पादपंकेरुहयुगळमहापादुके स्वस्वमूर्ध्ना
धर्तुं विष्णुप्रमुख्या अपि च सुमनसः प्रागकुर्वंस्तपांसि |
तत्तादृक्स्थूलभूतं पदकमलयुगं योगिहृद्ध्यानगम्यं
श्रीसुब्रह्मण्य साक्षात् स्फुरतु मम हृदि त्वत्कटाक्षेण नित्यं || 4 ||

यस्य श्रीशमुखामराश्च जगति क्रीडां च बाल्योद्भवां
चित्रारोपितमानुषा इव समालोक्याभवंस्तंभिताः |
लोकोपद्रवकृत्स नारदपशुर्यस्याभवद्वाहनं
सोऽस्मान् पातु निरंतरं करुणया श्रीबालषाण्मातुरः || 5 ||

येन साक्षाच्चतुर्वक्त्रः प्रणवार्थविनिर्णये |
कारागृहं प्रापितोऽभूत् सुब्रह्मण्यः स पातु मां || 6 ||

कारुण्यद्रुतपंचकृत्यनिरतस्यानंदमूर्तेर्मुखैः
श्रीशंभोः सह पंचभिश्च गिरिजावक्त्रं मिलित्वामलं |
यस्य श्रीशिवशक्त्यभिन्नवपुषो वक्त्राब्जषट्काकृतिं
धत्ते सोऽसुरवंशभूधरपविः सेनापतिः पातु नः || 7 ||

यः शक्त्या तारकोरःस्थलमतिकठिनं क्रौंचगोत्रं च भित्त्वा
हत्वा तत्सैन्यशेषं निखिलमपि च तान् वीरबाहुप्रमुख्यान् |
उद्धृत्वा युद्धरंगे सपदि च कुसुमैर्वर्षितो नाकिबृंदैः
पायादायासतोऽस्मान् स झटिति करुणाराशिरीशानसूनुः || 8 ||

यद्दूतो वीरबाहुः सपदि जलनिधिं व्योममार्गेण तीर्त्वा
जित्वा लंकां समेत्य द्रुतमथ नगरीं वीरमाहेंद्रनाम्नीं |
देवानाश्वास्य शूरप्रहितमपि बलं तत्सभां गोपुरादीन्
भित्त्वा यत्पादपद्मं पुनरपि च समेत्यानमत्तं भजेऽहं || 9 ||

यो वैकुंठादिदेवैः स्तुतपदकमलो वीरभूतादिसैन्यैः
संवीतो यो नभस्तो झटिति जलनिधिं द्योपथेनैव तीर्त्वा |
शूरद्वीपोत्तरस्यां दिशि मणिविलसद्धेमकूटाख्यपुर्यां
त्वष्टुर्निर्माणजायां कृतवसतिरभूत् पातु नः षण्मुखः सः || 10 ||

नानाभूतौघविध्वंसितनिजपृतनो निर्जितश्च द्विरावृ-
-त्त्यालब्धस्वावमाने निजपितरि ततः संगरे भानुकोपः |
मायी यत्पादभृत्यप्रवरतरमहावीरबाहुप्रणष्ट-
-प्राणोऽभूत् सोऽस्तु नित्यं विमलतरमहाश्रेयसे तारकारिः || 11 ||

येन कृच्छ्रेण निहतः सिंहवक्त्रो महाबलः |
द्विसहस्रभुजो भीमः ससैन्यस्तं गुहं भजे || 12 ||

भूरिभीषणमहायुधारव-
-क्षोभिताब्धिगणयुद्धमंडलः |
सिंहवक्त्रशिवपुत्रयो रणः
सिंहवक्त्रशिवपुत्रयोरिव || 13 ||

शूरापत्यगणेषु यस्य गणपैर्नष्टेषु सिंहाननो
दैत्यः क्रूरबलोऽसुरेंद्रसहजः सेनासहस्रैर्युतः |
युद्धे च्छिन्नभुजोत्तमांगनिकरो यद्बाहुवज्राहतो
मृत्युं प्राप स मृत्युजन्यभयतो मां पातु वल्लीश्वरः || 14 ||

अष्टोत्तरसहस्रांडप्राप्तशूरबलं महत् |
क्षणेन यः संहृतवान् स गुहः पातु मां सदा || 15 ||

अंडभित्तिपरिकंपिभीषण-
-क्रूरसैन्यपरिवारपूर्णयोः |
शूरपद्मगुहयोर्महारणः
शूरपद्मगुहयोरिवोल्बणः || 16 ||

नानारूपधरश्च निस्तुलबलो नानाविधैरायुधै-
-र्युद्धं दिक्षु विदिक्षु दर्शितमहाकायोऽंडषंडेष्वपि |
यः शक्त्याशु विभिन्नतामुपगतः शूरोऽभवद्बाहनं
केतुश्चापि नमामि यस्य शिरसा तस्यांघ्रिपंकेरुहे || 17 ||

केकिकुक्कुटरूपाभ्यां यस्य वाहनकेतुतां |
अद्यापि वहते शूरस्तं ध्यायाम्यन्वहं हृदि || 18 ||

देवैः संपूजितो यो बहुविधसुमनोवर्षिभिर्भूरिहर्षै-
-र्वृत्रारिं स्वर्गलोके विपुलतरमहावैभवैरभ्यषिंचत् |
तद्दत्तां तस्य कन्यां स्वयमपि कृपया देवयानामुदूह्य
श्रीमत्कैलासमाप द्रुतमथ लवलीं चोद्वहंस्तं भजेऽहं || 19 ||

तत्रानंतगुणाभिराममतुलं चाग्रे नमंतं सुतं
यं दृष्ट्वा निखिलप्रपंचपितरावाघ्राय मूर्ध्न्यादरात् |
स्वात्मानंदसुखातिशायि परमानंदं समाजग्मतुः
मच्चित्तभ्रमरो वसत्वनुदिनं तत्पादपद्मांतरे || 20 ||

दुष्पुत्रैर्जननी सती पतिमती कोपोद्धतैः स्वैरिणी-
-रंडासीत्यतिनिंदितापि न तथा भूयाद्यथा तत्त्वतः |
दुष्पाषंडिजनैर्दुराग्रहपरैः स्कांदं पुराणं महत्
मिथ्येत्युक्तमपि क्वचिच्च न तथा भूयात्तथा सत्यतः || 21 ||

किं तु तद्दूषणात्तेषामेव कुत्सितजन्मनां |
ऐहिकामुष्मिकमहापुरुषार्थक्षयो भवेत् || 22 ||

यत्संहिताषट्कमध्ये द्वितीया सूतसंहिता |
भाति वेदशिरोभूषा स्कांदं तत्केन वर्ण्यते || 23 ||

यस्य शंभौ परा भक्तिर्यस्मिन्नीशकृपामला |
अपांसुला यस्य माता तस्य स्कांदे भवेद्रतिः || 24 ||

षडाननस्तुतिमिमां यो जपेदनुवासरं |
धर्ममर्थं च कामं च मोक्षं चापि स विंदति || 25 ||

इति श्रीषडानन स्तुतिः |